# Brahmadibhih Kritam Shri Lalitadevi Stotram

# બ્રહ્માદિભિઃ કૃતં શ્રીલલિતાદેવીસ્તોત્રમ્

## Document Information

Text title : Brahmadibhih Kritam Shri Lalitadevi Stotram

File name : brahmAdibhiHkRRitaMshrIlalitAdevIstotram.itx

Category : devii, devI, brahmANDapurANa, stotra, lalitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmANDapurANa | uttarabhAga | lalitA | adhyAya 30/11-30||

Latest update : October 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 1, 2024

*sanskritdocuments.org*

# બ્રહ્માદિભિઃ કૃતં શ્રીલલિતાદેવીસ્તોત્રમ્

બ્રહ્માદ્યા ઊચુઃ ।
નમો નમસ્તે જગદેકનાથે નમો નમઃ શ્રીત્રિપુરાભિધાને ।
નમો નમો ભણ્ડમહાસુરઘ્ને નમોઽસ્તુ કામેશ્વરિ વામકેશિ ॥ ૧૧॥

ચિન્તામણે ચિન્તિતદાનદક્ષેઽચિન્તયે ચિરાકારતરઙ્ગમાલે ।
ચિત્રામ્બરે ચિત્રજગત્પ્રસૂતે ચિત્રાખ્યનિત્યે સુખદે નમસ્તે ॥ ૧૨॥

મોક્ષપ્રદે મુગ્ધશશાઙ્કચૂડે મુગ્ધસ્મિતે મોહનભેદદક્ષે ।
મુદ્રેશ્વરીચર્ચિતરાજતન્ત્રે મુદ્રાપ્રિયે દેવિ નમો નમસ્તે ॥ ૧૩॥

ક્રૂરાન્તકધ્વંસિનિ કોમલાઙ્ગે કોપેષુ કાલીં તનુમાદધાને ।
ક્રોડાનને પાલિતસૈન્યચક્રે ક્રોડીકૃતાશેષભયે નમસ્તે ॥ ૧૪॥

ષડઙ્ગદેવીપરિવારકૃષ્ણે ષડઙ્ગયુક્તશ્રુતિવાક્યમૃગ્યે ।
ષટ્ચક્રસંસ્થે ચ ષડૂર્મિયુક્તે ષડ્ભાવરૂપે લલિતે નમસ્તે ॥ ૧૫॥

કામે શિવે મુખ્યસમસ્તનિત્યે કાન્તાસનાન્તે કમલાયતાક્ષિ ।
કામપ્રદે કામિનિ કામશમ્ભોઃ કામ્યે કલાનામધિપે નમસ્તે ॥ ૧૬॥

દિવ્યૌષધાદ્યે નગરૌઘરૂપે દિવ્યે દિનાધીશસહસ્રકાન્તે ।
દેદીપ્યમાને દયયા સનાથે દેવાધિદેવપ્રમદે નમસ્તે ॥ ૧૭॥

સદાણિમાદ્યષ્ટકસેવનીયે સદાશિવાત્મોજ્જ્વલમઞ્ચવાસે ।
સભ્યે સદેકાલયપાદપૂજ્યે સવિત્રિ લોકસ્ય નમો નમસ્તે ॥ ૧૮॥

બ્રાહ્મીમુખૈર્માતૃગણૈર્નિષેવ્યે બ્રહ્મપ્રિયે બ્રાહ્મણબન્ધભેત્રિ ।
બ્રહ્મામૃતસ્રોતસિ રાજહંસિ બ્રહ્મેશ્વરિ શ્રીલલિતે નમસ્તે ॥ ૧૯॥

સઙ્ક્ષોભિણીમુખ્યસમસ્તમુદ્રાસંસેવિતે સંસરણપ્રહન્ત્રિ ।
સંસારલીલાકૃતિસારસાક્ષિ સદા નમસ્તે લલિતેઽધિનાથે ।
નિત્યે કલાષોડશકેન નામાકર્ષિણ્યધીશિ પ્રમથેન સેવ્યે ॥ ૨૦॥

નિત્યે નિરાતઙ્કદયાપ્રપઞ્ચે નીલાલકશ્રેણિ નમો નમસ્તે ।
અનઙ્ગપુષ્પાદિભિરુન્નદાભિરનઙ્ગદેવીભિરજસ્રસેવ્યે ।
અભવ્યહન્ત્ર્યક્ષરરાશિરૂપે હતારિવર્ગે લલિતે નમસ્તે ॥ ૨૧॥

સઙ્ક્ષોભિણીમુખ્યચતુર્દશાર્ચિર્માલાવૃતોદારમહાપ્રદીપ્તે ।
આત્માનમાબિભ્રતિ વિભ્રમાઢ્યે શુભાશ્રયે શુભ્રપદે નમસ્તે ॥ ૨૨॥

સશર્વસિદ્ધાદિકશક્તિવન્દ્યે સર્વજ્ઞવિજ્ઞાતપદારવિન્દે ।
સર્વાધિકે સર્વગતે સમસ્તસિદ્ધિપ્રદે શ્રીલલિતે નમસ્તે ॥ ૨૩॥

સર્વજ્ઞજાતપ્રથમાભિરન્યદેવીભિરપ્યાશ્રિતચક્રભૂમે ।
સર્વામરાકાઙ્ક્ષિતપૂરયિત્રિ સર્વસ્ય લોકસ્ય સવિત્રિ પાહિ ॥ ૨૪॥

વન્દે વશિન્યાદિકવાગ્વિભૂતે વર્દ્ધિષ્ણુચક્રદ્યુતિવાહવાહે ।
બલાહકશ્યામકચે વચોઽબ્ધે વરપ્રદે સુન્દરિ પાહિ વિશ્વમ્ ॥ ૨૫॥

બાણાદિદિવ્યાયુધસાર્વભૌમે ભણ્ડાસુરાનીકવનાન્તદાવે ।
અત્યુગ્રતેજોજ્જ્વલિતામ્બુરાશે પ્રસેવ્યમાને પરિતો નમસ્તે ॥ ૨૬॥

કામેશિ વજ્રેશિ ભગેશ્યરૂપે કન્યે કલે કાલવિલોપદક્ષે ।
કથાવિશેષીકૃતદૈત્યસૈન્યે કામેશયાન્તે કમલે નમસ્તે ॥ ૨૭॥

બિન્દુસ્થિતે બિન્દુકલૈકરૂપે બિન્દ્વાત્મિકે બૃંહિતચિત્પ્રકાશે ।
બૃહત્કુચામ્ભોજવિલોલહારે બૃહત્પ્રભાવે લલિતે નમસ્તે ॥ ૨૮॥

કામેશ્વરોત્સઙ્ગસદાનિવાસે કાલાત્મિકે દેવિ કૃતાનુકમ્પે ।
કલ્પાવસાનોત્થિતકાલિરૂપે કામપ્રદે કલ્પલતે નમસ્તે ॥ ૨૯॥

સવારુણે સાન્દ્રસુધાંશુશીતે સારઙ્ગશાવાક્ષિ સરોજવક્ત્રે ।
સારસ્ય સારસ્ય સદૈકભૂમે સમસ્તવિદ્યેશ્વરિ સન્નતિસ્તે ॥ ૩૦॥

તવ પ્રભાવેણ ચિદગ્નિજાયાં શ્રીશમ્ભુનાથપ્રકડીકૃતાયાઃ ।
ભણ્ડાસુરાદ્યાઃ સમરે પ્રચણ્ડા હતા જગત્કણ્ટકતાં પ્રયાતાઃ ॥ ૩૧॥

નવ્યાનિ સર્વાણિ વપૂંષિ કૃત્વા હિ સાન્દ્રકારુણ્યસુધાપ્લવૈર્નઃ ।
ત્વયા સમસ્તં ભુવનં સહર્ષં સુજીવિતં સુન્દરિ સભ્યલભ્યે ॥ ૩૨॥

ઇતિ બ્રહ્માણ્ડપુરાણે ઉત્તરભાગે ત્રિંશાધ્યાયાન્તર્ગતં
બ્રહ્માદિભિઃ કૃતં શ્રીલલિતાદેવીસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્માણ્ડપુરાણ । ઉત્તરભાગ । લલિતા । અધ્યાય ૩૦/૧૧-૩૦॥

brahmANDapurANa . uttarabhAga . lalitA . adhyAya 30/11-30..

Proofread by PSA Easwaran

*Brahmadibhih Kritam Shri Lalitadevi Stotram*

pdf was typeset on October 1, 2024

Please send corrections to *sanskrit@cheerful.com*